(ग) तृतीया (घ) चतुर्थी

ii. कर्मवाच्ये कर्मकारकस्य विभक्तिः भवति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

iii. कर्तृवाच्ये कर्त्ताकारकस्य विभक्तिः भवति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

iv. कर्तृवाच्ये कर्मकारकस्य विभक्तिः भवति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

v. 'रामेण हतो बाली' अस्मिन् वाक्ये रेखाङ्कितपदस्य कारकः अस्ति।

(क) कर्त्ता (ख) कर्म

(ग) करण (घ) सम्प्रदान

vi. छात्रः संस्कृतं पठति। रेखाङ्कितपदस्य कारकः अस्ति।

(क) कर्त्ता (ख) कर्म

(ग) करण (घ) सम्प्रदान

vii. 'विद्यार्थी वा त्यजेत् सुखम्' अस्मिन् वाक्ये 'सुखम्' पदस्य विभक्तिः अस्ति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

viii. तिलेषु तैलम् अस्ति। रेखाङ्कितपदस्य कारकं चिनोतु।

(क) कर्म (ख) सम्प्रदान

(ग) अपादान (घ) अधिकरण

ix. 'सर्वे विषयाः मया ज्ञाताः एव'। रेखाङ्कितपदस्य कारकं चिनोतु।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी



docs.aglasem.com
aglasem.com

x. संस्कृते .......................... कारकाः सन्ति।

(क) पञ्च (ख) षट्

(ग) सप्त (घ) अष्ट

xi. वाक्ये सुबन्तस्य क्रियया सह सम्बन्धं कथ्यते।

(क) कारकः (ख) अव्ययः

(ग) उपसर्गः (घ) कृदन्तः

xii. संस्कृते कारकः न मन्यते।

(क) कर्त्ता (ख) करण

(ग) अपादान (घ) सम्बन्ध

xiii. क्रियायाः आधारः कथ्यते।

(क) करण (ख) कर्म

(ग) सम्प्रदान (घ) अधिकरण

xiv. पार्थक्य साध्य–सति ध्रुवस्य कारकः भवति।

(क) करण (ख) सम्प्रदान

(ग) अपादान (घ) अधिकरण

प्रश्न 5 — अधोलिखितान् वाक्यान् संस्कृतभाषया अनुवादं करोतु।

i. मैं आंखों से देखता हूँ।

ii. पिताजी मुझ पर क्रोध करते हैं।

iii. गुरूजी छात्र को पुस्तक देते हैं।

iv. सुमति बस के द्वारा भिलाईनगर गयी।

v. हे बालक! यहां पर आओ।

vi. बिलासपुर छत्तीसगढ़ की न्यायधानी है।

vii. आपका निवास कहां है ?

viii. बालक गेंद से खेलता है।

ix. बन्दर वृक्ष से गिर गया।

x. हमारा प्रदेश छत्तीसगढ़ है।



docs.aglasem.com
aglasem.com

# 11. अनुच्छेद/निबन्ध–लेखन (रचना–कौशल)

टीप – रचना–कौशल के अन्तर्गत विद्यार्थियों के स्वतंत्र लेखन को बढ़ावा देने हेतु पाठ्यपुस्तक में दिये गये निबन्ध–रचना के अतिरिक्त अन्य विषय/शीर्षक भी दिये जाने चाहिए। सरलता की दृष्टि से यथानुसार संकेत–आधारित रचना भी दिया जा सकता है। नीचे कुछ उदाहरण प्रस्तुत हैं –

प्रश्न 1 – मञ्जूषायाः पदानि नीत्वा ''मम विद्यालय'' इत्यस्मिन् विषये षड् वाक्यनि रचयतु।

मञ्जूषा –

| |
|---|
| आदर्शः विद्यालयः, श्रेष्ठः प्राचार्यः, अनेके शिक्षकाः, विषयान्, पञ्च–सहस्रं छात्राः, बालक–बालिकाः प्रसिद्धः, नगरे, पङ्क्तिबद्धाः प्रार्थयन्ति |

प्रश्न 2 – मञ्जूषायाः पदानि नीत्वा ''अस्माकं विद्यालयः'' इत्यस्मिन् विषये षड् वाक्यनि रचयतु।

मञ्जूषा –

| |
|---|
| छात्राः, विशालभवनं, योग्यम्, क्रीडाक्षेत्रे, परिश्रमेण, पठन्ति, प्रयोगशाला, पुस्तकालयः, उद्यानम्, पाठयन्ति, प्रातः, अष्टवादने, संस्कृतम्, प्रधानाचार्यः, उत्सवः, अपि, च |

प्रश्न 3 – मञ्जूषायाः पदानि नीत्वा ''अध्ययनस्य महत्वम्'' इत्यस्मिन् विषये षड् वाक्यनि रचयतु।

मञ्जूषा –

| |
|---|
| ज्ञानम्, च, सम्मानम्, अपि सर्वत्र, धनम्, शक्नोति, यशः वर्धते, विदुषाम्, भवति, प्रसरति, प्राप्नोति, आदरः, अर्जयितुम् |

प्रश्न 4 – मञ्जूषायाः पदानि नीत्वा ''यातायात–अव्यवस्था'' इत्यस्मिन् विषये षड् वाक्यनि रचयतु।

मञ्जूषा –

| |
|---|
| दिल्लीनगरे, मोटरयानानि, अत्यधिकानि, मार्गे, अवरोधाः मार्गस्य, उभयतः, गच्छन्ति, जनाः, मध्ये, विद्युत्स्तम्भाः, स्कूटरयानानि, विपणनकेन्द्रम्, चलन्ति |



docs.aglasem.com
aglasem.com

प्रश्न 5 – मञ्जूषायाः शब्दानाम् सहायतया चित्रस्य वर्णनं षडवाक्येषु कुरूत।



मञ्जूषा – 

| |
|---|
| बालकाः, बालिकाः, शिक्षिका, उपविष्टाः, एकः, उत्थाय, पठन्ति, ध्यानेन, पाठयति, पठति, सर्वे, श्यामपट्टम्, पुस्तकानि, सर्वत्र। |

प्रश्न 6 – मञ्जूषायाः शब्दानाम् सहायतया चित्रस्य वर्णनं षडवाक्येषु कुरूत।



मञ्जूषा – 

| |
|---|
| खेलस्य क्षेत्रम् वर्तते, क्षेत्रं हरितमस्ति, अनेके क्रीडकाः, कबड्डी खेलम्, खेलन्ति, ते, सर्वे, बलिष्ठाः सन्ति, स्टेडियम्, भवनम्, अपि अस्ति, एव प्रतिद्वन्द्विनं विजेतुम् इच्छन्ति |

प्रश्न 7 – मञ्जूषायाः शब्दानाम् सहायतया चित्रस्य वर्णनं षडवाक्येषु कुरूत।



मञ्जूषा – 

| |
|---|
| सैनिकाः, पथसंचलनं, टोपिकाः, भुशुण्डीः, सैन्यवस्त्राणि, वायुयानानि, गर्वामः, रक्षन्ति, शत्रुभ्यः, देशम्, गणतंत्रदिवसस्य |


docs.aglasem.com
aglasem.com

प्रश्न 8 – मञ्जूषायाः शब्दानाम् सहायतया चित्रस्य वर्णनं षडवाक्येषु कुरूत।



मञ्जूषा –

| |
|---|
| उपवनस्य, महिलाः, बालकाः, क्रीडन्ति, पुष्पाणि, विकसन्ति, वृक्षैः, शुद्धम, भवति, भ्रमन्ति |

प्रश्न 9 – निबन्ध रचना हेतु अन्य शीर्षक/विषय।

i. मम संस्कृत पुस्तकम्
ii. उद्यानम्
iii. धेनुः
iv. माता सरस्वती
v. अनुशासनम्
vi. व्यायामः
vii. श्रमस्य महत्वम्
viii. परिवारस्य परिचयः
ix. मम प्रिय मित्रम्
x. मम प्रियः उत्सवः
xi. मम प्रियः महापुरूषः
xii. स्वतंत्रता–दिवसः



docs.aglasem.com
aglasem.com

# 12. अपठित गद्यांशः

प्रश्न 1 – अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत।

मानवः संसर्गशीलः भवति। सामाजिकः प्राणी अपि मानवसंसर्गेण विना जीवितुं न शक्नोति। सज्जनाः दुर्जनाः वा सर्वे एव संगतिम् इच्छन्ति। संसर्गस्य महती आवश्यकता वैशिष्ट्यं चास्ति। संसर्गतः एव मनुष्येषु गुणाः दोषाश्च समाविशन्ति। यदा मनुष्यः कुसंगतिं करोति तदा सः दुर्जनः भवति यदा च सत्संगतिम् करोति तदा सः सज्जनः भवति। संसर्गकारणात् एव सज्जनाः दुर्जनाः भवन्ति दुर्जनाः च सज्ज्नाः जायन्ते। कीटः अपि सुमनसा सह सतां शिरः आरोहति। अतः अस्माभिः सदा सत्संगतिः करणीया।

I. **एकपदेन उत्तरत –**

i. कीटः केषां शिरं आरोहति ?

ii. मानवः कीदृशः प्राणी अस्ति ?

II. **पूर्णवाक्येन उत्तरत –**

i. सत्संसर्गस्य के लाभाः सन्ति ?

ii. कः मानवसंसर्गेण विना जीवितुं न शक्नोति ?

III. **भाशिककार्यम्**

i. ''सताम्'' इति पदस्य विलोमपदं किम् अस्ति ?

ii. ''सज्जनाः दुर्जनाः वा सर्वे एव संगतिम् इच्छन्ति।'' अत्र 'इच्छन्ति' इति क्रियापदस्य कर्तृपदम् किम् ?

iii. ''अस्मिाभिः सदा सत्संगतिः करणीया।'' अस्मिन् वाक्ये किं क्रियापदम् ?

IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखतु।

प्रश्न 2 – अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत।

भारतीया संस्कृतिः कर्मसिद्धान्तं प्रतिपादयति। जीवाः कर्मवशात् विविधाः योनीः लभन्ते। मनुष्ययोनिं लब्ध्वा यदि कश्चित् जीवः धर्मार्थकामनया सामञ्जस्यं स्थापयित्वा जीवनं निर्वहति, तदा सः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते। विश्वस्य सर्वासु अपि संस्कृतिषु भारतीया संस्कृतिः प्राचीनतमा वर्तते। समन्वयात्मकस्वभावात् सहिष्णुताप्रकर्षत्वात् च अनन्तान् भीषणतमान् प्रहारान् सोढ्वा अपि एषा जीवति। भारतीया संस्कृतिः सर्वेषां देशानां जातीनां च कल्याणं कर्तुं सक्षमाऽस्ति।


docs.aglasem.com
aglasem.com

I. **एकपदेन उत्तरत** –

i. भारतीया संस्कृतिः किं प्रतिपादयति ?

ii. जीवाः कस्मात् विविधाः योनीः लभन्ते ?

II. **पूर्णवाक्येन उत्तरत** –

i. कदा मनुष्यः पुनरागमनचक्रात् विमुक्तो भूत्वा मोक्षं लभते ?

ii. भारतीया संस्कृतिः किं कर्तुं सक्षमाऽस्ति ?

III. **भाषिककार्यम्**

i. ''लभन्ते'' इति क्रियायाः कर्तृपदम् किम् ?

ii. ''समर्था'' इति पदस्य अत्र किं पर्यायपदम् ?

iii. ''परतंत्र'' इति पदस्य अत्र किं विलोमपदम् ?

IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखतु।

प्रश्न 3 – अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत।

अयं संसारः सत्ये प्रतिष्ठितः। यतः यथा चिन्तनं भवति तथा तस्य कथनम् आचरणं च सत्यम् च सत्यम् इति भवति। तस्मात् विपरीतं तत् असत्यं भवति। सत्यं नरस्य सामान्या प्रवृत्तिः। असत्यं तु असामान्या निन्द्या च प्रवृत्तिः। अस्य तुप्रमाणं बालाः, सत्वगुणप्रधानाः मुग्धमुग्धाः ग्रामीणाः पर्वतीयाश्च जनाः। बालः यद् यथा चिन्तयति पश्यति करोति च, तत् तत् तथैव अपृष्टो वा अन्यं प्रति कथयति। न तत्र असत्यं वदति।

I. **एकपदेन उत्तरत** –

i. सत्यं कस्य सामान्या प्रवृत्तिः ?

ii. अयं संसारः कस्मिन् प्रतिष्ठितः ?

II. **पूर्णवाक्येन उत्तरत** –

i. सत्यं किं भवति ?

ii. बालः अन्यं प्रति किं कथयति ?

III. **भाषिककार्यम्**

i. ''कथयति'' इति क्रियायाः कर्तृपदम् किम् ?

ii. ''अनृतम्'' इति पदस्य अत्र किं पर्यायपदम् ?

iii. ''प्रशंस्या'' इति पदस्य अत्र किं विलोमपदम् ?

IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखतु।



docs.aglasem.com
aglasem.com

प्रश्न 3 – अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत।

आधुनिके औद्योगिके युगे प्रदूषणस्य समस्या दिनं प्रतिदिनं वर्धते एव। कुत्रापि स्वच्छः वायुः न प्राप्यते, न स्वच्छं जलं लभ्यते न च स्वच्छानि खाद्यपदार्थानि प्राप्यन्तें। अद्यत्वे यन्त्रालयानां यानानां च धूमेन सम्पूर्णवायुमण्डलं दूषितं सञ्जातम्। दूषितः वायुः एव श्वासेन हृदये प्रविशति। अतः विविधाः श्वासरोगाः, हृदयरोगाः, चर्मरोगाः, नेत्ररोगाः च जनान् पीडयन्ति। वायुप्रदूषणस्य प्रमुखतमं कारणम् औद्योगिकविकासः अस्ति। वृक्षाणां विनाशं कृत्वा जनाः आद्योगिकक्षेत्राणां विकासं तु कुर्वन्ति किन्तु ते प्रकृतिदेवीमपि सम्पीडयन्ति। विज्ञानस्य प्रगत्या नित्यं नूतनयन्त्राणामपि अविष्कारः भवति। अतः अस्माभिः सर्वैः मिलित्वा प्रदूषणसमस्यायाः समाधानं कर्तव्यम्।

I. **एकपदेन उत्तरत –**

i. दूषितः वायुः कथं हृदये प्रविशति ?

ii. अस्माभिः कस्याः समाधानं कर्तव्यम् ?

II. **पूर्णवाक्येन उत्तरत –**

i. वायूप्रदूषणेन के के रोगाः भवन्ति ?

ii. जनाः केन प्रकारेण प्रकृतिदेवी सम्पीडयन्ति ?

III. **भाशिककार्यम्**

i. ''दुःखीकुर्वन्ति'' अस्य पदस्य अनुच्छेदे कः पर्यायः ?

ii. ''मलिनम् अस्य किं विपर्ययपदं प्रयुक्तम् ?

iii. ''प्राप्यन्ते'' इति क्रियायाः कर्तृपदं किम् ?

IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखतु।



docs.aglasem.com
aglasem.com

# 13. पत्र–लेखनम्

प्रश्न 1 – भवतः नाम दिलीपः अस्ति। भवान् दुर्गनगरे छात्रावासे निवसति। अतः धनराशिं प्रेषितुं पितरं प्रति पत्रं लिखतु।

प्रश्न 2 – भवान् पुरूषोत्तमः। भवतः पुत्रः निखिलः जगदलपुरे छात्रावासे निवसन् महाविद्यालये पठति। तस्य कुशलक्षेमं ज्ञातुं पुत्रं प्रति पत्रं लिखतु।

प्रश्न 3 – भवत्याः नाम सिया अस्ति। भवत्याः विद्यालस्य वर्णनं कुर्वन् मातरं प्रति पत्रं लिखत।

प्रश्न 4 – भवत्याः नाम सुरूचिः। भवती शासकीय उच्च्तर माध्यमिक विद्यालय अर्जुन्दायां नवम कक्षायां पठति। भवती ज्वरेण पीडितोऽस्ति। तस्मात् कारणात् त्रिदिवसस्य अवकाशाय स्वप्राचार्यं प्रति आवेदनपत्रं लिखतु।

प्रश्न 5 – अधः पितरं प्रति लिखते पत्रे दत्तनि रिक्तस्थानानि मञ्जूषातः चित्वा उचितपदैः पूरयतु।

| |
|---|
| भवदीयः, परीक्षा, प्रणमामि, आगमिष्यामि, सफलो, व्यवस्थापि, परीक्षानन्तरं, चरणयोः |

बालोदतः

15 / 07 / 2022

पूज्य पितः!

सादरं चरणौ ..................

अत्र कुशलं तत्रास्तु, मया भवदीय कृपापात्रं प्राप्तम्, मार्चमासे मम वार्षिकी .................. भविष्यति। साम्प्रतम् अहम् अध्ययने सम्यग् दत्तचित्तेऽस्मि। छात्रावासे च मम भोजनादि .................. साम्प्रतं समीचीना वर्तते। आशासे अस्यां परीक्षायाम् अहं .................. भविष्यामि, .................. च गृहं प्रति .................. । पूज्यायाः मातुः .................. मम प्रणतयः कथनीयाः।

पत्रोत्तरप्रतीक्षायाम्।

.................. पुत्रः

दिलीपः



docs.aglasem.com

aglasem.com

प्रश्न 5 – अधः मित्रं प्रति लिखतं पत्रं पठित्वा दत्तप्रश्नानाम् उत्तराणि लिखतु।

धरसीवांतः

दिनाङ्क 07/07/2022

प्रिय मित्र राजेन्द्र!

नमस्कारः

अत्र कुशलं तत्रास्तु। तव प्रेमयुक्तं पत्रं प्राप्य अतीव प्रसन्नोऽस्मि। ईश्वरस्य अनुकम्पया वयमपि अत्र कुशलिनः। मम विद्यालये ग्रीष्मावकाशः 01/05/2023 तिथेः प्रारम्भः भविष्यति। तव विद्यालयः कदा पिधास्यते ?

अस्मिनः वर्षे ग्रीष्मावकाशे सपरिवारोऽहं जगदलपुरं गन्तुम् इच्छामि। नगरमेतत् परं रमणीयम्। अतएव त्वमपि मया सह जगदलपुरम् आगच्छ। आशासे यत् अत्रागमनेन त्वं माम् अनुगृहीतं करिष्यसि।

कुशलमन्यत। परिचितेभ्यो नमः। पत्रोत्तरं देहि शीघ्रम्।

तव मित्रं

धीरेन्द्रः

प्रश्नाः –

i. इदं पत्रं कुतः लिखितम् ?

ii. धीरेन्द्रः सपरिवारेण कुत्र गन्तुम् इच्छति ?

iii. विद्यालये ग्रीष्मावकाशः कदा प्रारंभः भविष्यति ?

iv. धीरेन्द्र कस्य पत्रं प्राप्तम् ?

v. धीरेन्द्रः कं पत्रं लिखितम् ?

vi. इदं पत्रं कदा लिखितम् ?

vii. इदं पत्रं केन लिखितम् ?



docs.aglasem.com
aglasem.com

# 14. गद्य–खण्ड

प्रश्न 1 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

गोपालः – विवेकानन्दः बाल्यकाले कीदृशः आसीत् ? सः किं किं करोति स्म ?

पीलाराम : – विवेकानन्दः बाल्यकाले साहसी आसीत्। तस्मै क्रीडा अतीव रोचते स्म।

गोपालः – सः कथं प्रसिद्धः जातः ?

पीलारामः – सः जिज्ञासुः आसीत्। धर्मविषये तस्य जिज्ञासा कालक्रमेण बलवती जाता। भाषाध्ययनं तस्य ज्ञानवृद्धिम् अभवत्। सः महान् वक्तारूपेणापि ख्यातिं प्राप्तवान्।

प्रश्नाः –

i. ''सः किं किं करोति स्म ?'' अस्मिन् वाक्ये कर्तृपदं किमस्ति ?

ii. ''तस्मै'' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

iii. कः जिज्ञासुः आसीत् ?

iv. विवेकानन्दः कीदृशः आसीत् ?

प्रश्न 2 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

विद्यावति – किमर्थं शीघ्रम् ?

फ्लोरा – गृहे शाकं नास्ति। भवती आपणं गत्वा शाकम् आनयतु।

विद्यावती – फ्लोरे ! अहं वस्त्रं धृत्वा गच्छामि।

फ्लोरा – शीघ्रं द्विचक्रिकया गच्छतु।

विद्यावती – द्विचक्रिका सम्यक् नास्ति।

फ्लोरा – किं घटितम् ?

विद्यावती – इयं भग्ना जाता। अहं धावित्वा गच्छामि।

फ्लोरा – धावित्वा मा गच्छतु। आपणे यातायातं सघनं भवति। त्वया सर्तकतापेक्षिता। श्रृणोतु! सूरणस्य मूल्यम् अपि ज्ञातव्यम्।



docs.aglasem.com
aglasem.com

प्रश्नाः –

i. ''भवती आपणं गत्वा शाकम् आनयतु'' अस्मिन् वाक्ये अव्ययपदं किम् अस्ति ?

ii. ''इयं भग्ना जाता'' अस्मिन् वाक्ये विशेषण पदं किमस्ति ?

iii. का सम्यक् नास्ति ?

iv. कस्य मूल्यम् अपि ज्ञातव्यम् ?

प्रश्न 3 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

एकदा आकाशे एकः मेघः सञ्चरन् आसीत्। सः कृषकं दृष्ट्वा आश्चर्यचकितः सन् तम् अपृच्छत् – ''हे कृषक ! अत्र त्रिवर्षपर्यन्तं वृष्टिः न भविष्यति इति किं भवता न श्रुतम् ? तत्कारणेनैव सर्वे जनाः ग्रामं परित्यज्य यत्र कुत्रापि गताः। तथापि भवान् किमर्थम् इदं शुष्कं क्षेत्रं वृथा कर्षति'' इति।

प्रश्नाः –

i. ''एकः मेघः'' अनयोः पदयोः विशेष्यपदं किमस्ति ?

ii. ''सः'' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

iii. ''कर्षति'' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

iv. गद्यांशतः अव्ययपदं चित्वा लिखतु।

प्रश्न 4 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

तत् श्रुत्वा मेघः ''साधु, साधु'' इति वदन् चिन्तितवान् – ''यदि अहमपि त्रिवर्षं यावत् न वर्षामि तर्हि मया अपि वर्षणं विस्मृतं भवेत्। अतः अहम् अधुना एव वर्षामि'' इति।

ततः सः झटिति सर्वान् मेघान् आहूय ''कृपया वर्षन्तु'' इति प्रार्थितवान्। तदा तत्र सुवृष्टिः अभवत्। सर्वेऽपि ग्रामवासिनः आनन्देन स्व–स्वक्षेत्रेषु कृषिकार्यम् आरब्धवन्तः।

प्रश्नाः –

i. ''सर्वान् मेघान'' अनयोः पदयोः विशेषणपदं किमस्ति ?

ii. ''यदि अहं कृषिकार्यं न करोमि'' अस्मिन् वाक्ये कर्तृपदं किमस्ति ?

iii. ''शोभनम्'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

iv. ''सर्वे विषयाः मया ज्ञाताः'' एतस्य वाक्यस्य वाच्यपरिवर्तनं कृत्वा पुनः लिखतु।



docs.aglasem.com
aglasem.com

प्रश्न 5 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

वनम् अस्माकं महान् निधिः अस्ति। न केवलं वनानां रमणीयता मनांसि रञ्जयति, अपितु अनेन पर्यावरणमपि सुरक्षितं भवति। ये घटकाः परिस्थितिकितन्त्रं प्रभावयन्ति, तेषु घटकेषु वनं सर्वप्रमुखमस्ति। वस्तुतं वनं वसुन्धरायाः सुसरक्षावलयमस्ति। वृष्टेः मुख्यं कारणं वनमेव अस्ति। इदं शुद्धं वायुं प्रददाति। मृत्तिकायाः अपर्दनं न्यूनीकरोति। जगतः तापमानस्य नियन्त्रणं करोति। अतएव वनसंरक्षणम् अत्यावश्यकमस्ति।

प्रश्नाः –

i. ''वनम् अस्माकं महान् निधिः अस्ति।'' अस्मिन् वाक्ये विशेष्यपदं किमस्ति ?

ii. ''काननम्'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखत।

iii. वनं कस्य तापमानस्य नियन्त्रणं करोति ?

iv. वनं कस्याः सुरक्षावलयमस्ति ?

v. ''प्रभावयन्ति'' इति क्रियापदस्य कर्तृपदं किमस्ति ?

प्रश्न 6 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

वन्यजीवानां बहुलता विविधता च प्रदेशस्य गौरवम्। एतेषाम् उपलब्धता तत्क्षेत्रे वनानां सुस्थितिः द्योतते। एतेषु वन्यजीवेषु प्रमुखतः व्याघ्रः, तरक्षुः, वनमहिषः, हरिणः, साम्भरः, गौरः, वनवराहः, भल्लूकः, पर्वतसारिका, नीलगौः, चिंकारादयः चेति। वनमहिषः राजकीयपशुः पर्वतसारिका राजकीयपक्षी च घोषितौ। वन्यजीवानां रक्षणार्थमपि वनसंरक्षणं आवश्यकम्।

नूनं वनं जीवानाम् आश्रयस्थलमस्ति। तस्मात् कारणात् प्रदेशे राष्ट्रियोद्यानानि अभयारण्यानि च संस्थापितानि सन्ति।

प्रश्नाः –

i. ''एतेषु वन्यजीवेषु'' अनयोः पदयोः विशेषणपदं किमस्ति ?

ii. केषां रक्षणार्थं वनसंरक्षणम् आवश्यकम् अस्ति ?

iii. का राजकीयपक्षी घोषितः ?

iv. राष्ट्रीयोद्यानानि किमर्थं संस्थापितानि ?



docs.aglasem.com
aglasem.com

प्रश्न 7 — अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

बृहन्नला — अभिमन्यो !

अभिमन्युः — कथं ? कथम् ? अभिमन्युर्नामाहम्। भोः ! किमत्र विराटनगरे क्षत्रियवशोद्भूताः नीचैः अपि नामभिः अभिभाष्यन्ते अथवा अहं शत्रुवंश गतः। अतएव तिरस्क्रियते।

बृहन्नला — अभिमन्यो ! सुखमास्ते ते जननी ?

अभिमन्युः — कथं कथम् ? जननी नाम ? किं भवान् मे पिता अथवा पितृव्यः ? कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे ?

बृहन्नला — अभिमन्यो ! अपि कुशली देवकीपुत्रः केशवः ?

अभिमन्युः — कथं कथम् ? तत्रभवन्तमपि नाम्ना। अथ किम् अथ किम ? (उभौ परस्परमवलोकयतः)

अभिमन्युः — कथामिदानीं सावज्ञमिव मां हस्यते ?

प्रश्नाः —

i. ''पृच्छसे'' इति क्रियापदस्य कर्तृपदं किमस्ति ?

ii. ''अम्बा'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

iii. ''मे'' इति पदे का विभक्तिरस्ति ?

iv. कस्याः पुत्रः केशवः ?

प्रश्न 8 — अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

''पितरम् अर्जुनं स्मरन् अहं कथं हन्याम्।'' एतस्मिन वाक्ये यः पदम् अस्ति तस्य परिचयं मञ्जूषातः चित्वा लिखत।

| क्रियापदम् / कर्तृपदम् / अव्ययपदम् / विशेषणं / विशष्यं / शतृप्रत्ययान्तपदं |
|---|

प्रश्न 9 — अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

किशोरावस्थायां रामेश्वरकँवरः गंभीरप्रवृत्तिं प्राप्तवान्। जनजातीयसमूहस्य दुरवस्थां विलोक्य सः भृशं दुःखी आसीत्। तत्रभवान् तान् आत्मनिर्भरकरणार्थं भगीरथप्रयत्नं कृतवान्। एकदा रामेश्वरकँवरः टीपाझरननाम्नि स्थाने अष्टदिनात्मकं अहर्निशं साधनामकरोत्। सः जनान् उपदिशति स्म।



docs.aglasem.com
aglasem.com

प्रश्नाः –

i. "सः भृशं दुःखी आसीत्।" अस्मिन् वाक्ये सः इति सर्वनामपदं कस्मै प्रयुक्तम् ?
ii. "दृष्ट्वा" इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।
iii. "दुरवस्थाम्" इति पदे कः उपसर्गः अस्ति ?
iv. "अहर्निशम्" इति पदे कः समासः अस्ति ?

प्रश्न 10 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

गहिराग्रामे सः शिवमन्दिरस्य निर्माणमपि कारितवान्। मन्दिरस्य प्राङ्गणे च प्रतिदिनं कीर्तनं करोति स्म। सः रात्रौ भगवद्चिन्तनं कुर्वन् वने इतस्ततश्च भ्रमति स्म। यदा कदा सः समाधिमपि अधिगच्छति स्म। शनैः शनैः तस्य सम्बोधनं गहिरागुरूः अभवत्। सः जनजातीयसमूहस्य नेतृत्वम् अकरोत्। स्वभावतः जनेषु लोकप्रियः अभवत्।

प्रश्नाः –

i. अकरोत् इति क्रियापदस्य कर्तृपदं किमस्ति ?
ii. "दिवसे" इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखतु।
iii. "सः जनजातीयसमूहस्य नेतृत्वम् अकरोत्"। अस्मिन् वाक्ये सः इति सर्वनामपदं कस्मै प्रयुक्तम् ?
iv. "अटति" इति क्रियापदस्य पर्यायपदं गद्यांशात् चित्वा लिखतु।

प्रश्न 11 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

नीलेशः – अहं ब्रेललिपिमाध्यमेन पठनं लेखनं च करोमि। इयं विशिष्टा लिपिः अस्ति।

धनुषः – अतीव शोभनमस्ति।

नीलेशः – मित्र.! मम पूर्वविद्यालये मम कृते सर्वाणि साधनानि सुलभानि आसन्।

धनुषः – कानि कानि साधनानि ?

नीलेशः – विद्यालयं परितः दृष्टिबाधितमित्राणां कृते विशेषः मार्गः निर्मितः।

धनुषः – अयं मार्गः कथं लाभप्रदः ?



docs.aglasem.com
aglasem.com

प्रश्नाः –

i. ''अयं मार्गः'' अनयोः पदयोः विशेषणपदं किमस्ति ?

ii. ''सर्वाणि साधनानि'' अनयोः पदयोः विशेष्यपदं किम् अस्ति ?

iii. ''कठिनानि'' इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखत।

iv. परितः योगे का विभक्तिः भवति ?

प्रश्न 12 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

नीलेशः – आम्! विद्यालये एकः सङ्गणकः अपि मम मित्रम् आसीत्।

धनुषः – तेन किम् भवति ?

नीलेशः – सङ्गणके एका विशिष्टा सुविधा वर्तते। मम वचनं श्रुत्वा सङ्गणकः लेखितुं शक्नोति।

धनुष : – भवतः वृत्तान्तं श्रुत्वा दृष्ट्वा च अहमपि स्फूर्तिम् अनुभवामि। एतादृशानि साधनानि सर्वेभ्यः दृष्टिबाधितेभ्यः सुलभनि भवेयुः।

प्रश्नाः –

i. ''एकः सङ्गणकः'' अनयोः पदयोः विशेष्यपदं किमस्ति ?

ii. अनुभवामि इति क्रियापदस्य कर्तृपदं किमस्ति ?

iii. क्त्वा प्रत्ययस्य उदाहरणं गद्यांशतः चित्वा लिखतु।

iv. लेखतुम् इति शब्दे कः प्रत्ययः अस्ति ?

प्रश्न 13 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

तपोदत्तः – अहमस्मि तपोदत्तः। बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाधीतवानस्मि। तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्। (ऊर्ध्वं निःश्वस्य)
हा विधे! किमिदम्मया कृतम् ? कीदृशी दुर्बुद्धिरासीत्तदा! एतदपि न चिन्तितम्।



docs.aglasem.com
aglasem.com

प्रश्नाः –

i. ''सर्वेः कुटुम्बिभिः'' अनयोः पदयोः विशेष्यपदं किमस्ति ?

ii. रिपुभिः इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखतु।

iii. ''निन्दितः'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

iv. ''अभवम्'' इति क्रियापदस्य कर्तृपदं किमस्ति ?

प्रश्न 14 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

भो नरोत्तम ! नाऽहं जाने यत् कोऽस्ति भवान्। परन्तु भवद्भिः उन्मीलितं मे नयनयुगलम्। तपोमात्रेण विद्यामवाप्तुं प्रयतमानोऽहमपि सिकताभिरेव सेतुनिर्माणप्रयासं करोमि। तदिदानीं विद्याध्ययनाय गुरूकुलमेव गच्छामि।

प्रश्नाः –

i. ''गच्छामि' इति क्रियापदस्य कर्तृपदं लिखतु।

ii. ''मे'' इति पदे का विभक्तिरस्ति ?

iii. ''लोचनम्'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

iv. अविद्या इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखतु।

प्रश्न 15 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

साम्प्रतम् अखिल संसारे अशान्तेः हिंसायाः च साम्राज्यं व्याप्तम् अस्ति। येन साधनसम्पन्नः अपि मानवः सुखस्य स्थाने दुःखमेव अनुभवति। यद्यपि ज्ञानबलेन मानवः इदानीं आकाशे विचरितुं, सागरान् सन्तर्तुं, विश्वभ्रमणं कर्तुं चन्द्रादिग्रहेषु च गन्तुं समर्थः अस्ति, तथापि परस्परं सम्बन्धानां कटुता अशान्तिः चैव दृश्यते।

प्रश्नाः –

i. ''अनुभवति'' इति क्रियापदस्य कर्तृपदं किमस्ति ?

ii. ''गगने'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

iii. ''शान्तेः'' इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखतु।

iv. कः सागरान् सन्तर्तुं समर्थः अस्ति ?



docs.aglasem.com
aglasem.com

प्रश्न 16 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

अधुना संसारस्य कतिपयेषु महाद्वीपेषु परस्परं शत्रुतायाः हिंसायाश्च साम्राज्यं व्याप्तमस्ति। अखिलं विश्वं विविधाभिः समस्याभिः पीडितम् अस्ति। जीवने शान्तिः दुर्लभा जाता। कुत्रचित् श्वेताश्वेतयोः कारणात् कलहो वर्तते। कुत्रचित् धर्मभेदः विद्वेषस्य कारणमस्ति। कुत्रचित् तु वर्गभेदः, लिंगभेदः, जातिभेदः वा। स्वार्थाय, अहंकाराय शक्तिवर्धनाय चापि देशाः संघर्षरताः सन्ति। अनेन मानवः एव मानवहन्ता सञ्जातः।

प्रश्नाः –

i. ''समस्याभिः'' इति पदस्य विशेषणपदं गद्यांशतः चित्वा लिखतु।
ii. परमार्थाय इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखतु।
iii. ''श्वेताश्वेतयोः'' इति पदस्य समासविग्रहं कृत्वा लिखतु।
iv. कः एव मानवहन्ता सञ्जातः ?

प्रश्न 17 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

आसीत् कस्मिश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च विभवक्षयाद्देशान्तर गन्तुमिच्छन् व्यचिन्तयत्। ''यत्रदेशेऽथवा स्थाने भोगाः भुक्ताः स्थीयतेः तस्मिन्विभवहीनो यो वसेत्स पुरूषाधमः।।'' तस्य च गृहे लौहघटिता पूर्वपुरूषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनःस्वपुरमागत्य तं श्रेष्ठिनमुवाच– ''भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।

प्रश्नाः –

i. 'वणिक्पुत्रः' इति कर्तृपदस्य किं क्रियापदं अत्र प्रयुक्तम् ?
ii. 'स च विभवक्षयाद्देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्' अस्मिन् वाक्ये स इति सर्वनामपदं कस्मै प्रयुक्तम् ?
iii. 'सुचिरं कालं' अनयोः पदयोः विशेष्यपदं किम् अस्ति ?
iv. 'सदने' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

प्रश्न 18 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

स आह – ''भोः सत्यवादिन्! यथा श्येनो बालं न नयति, तथा मूषका अपि लौटघटितां तुलां न भक्षयन्ति। तदर्पय मे तुलाम यदि दारकेण प्रयोजनम्।'' इति।



docs.aglasem.com
aglasem.com

एवं विवदमानौ तौ द्वावपि राजकुलं गतौ। तत्र श्रेष्ठी तारस्वरेण प्रोवाच– ''भोः! अब्रह्मण्यम्। अब्रह्मण्यम्! मम शिशुरनेन चौरेणापहृतः'' इति।

अथ धर्माधिकारिणस्तमूचुः – ''भोः! समर्पयतां श्रेष्ठिसुतः''।

स आह – ''किं करोमि? पश्यतो मे नदीतदाच्छ्येनेन अपहृतः शिशुः''। इति।

प्रश्नाः –

i. ''तौ द्वावपि राजकुलं गतौ'' अस्मिन् वाक्ये कर्तृपदं किमस्ति ?

ii. ''शिशुरनेन'' इति पदस्य सन्धिविच्छेदं कृत्वा लिखतु।

iii. ''मूषका अपि लौहघटितां तुलां न भक्षयन्ति'' अस्मात् वाक्यात् अव्ययपदं चित्वा लिखत।

iv. कः तारस्वरेण प्रोवाचः ?

प्रश्न 19 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुं निर्जगाम। किन्तु तेन सह केलिभिः क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतस्ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणा बभूवुः। तन्द्रालुर्बालो लज्जया तेषां दृष्टिपथमपि परिहरन्नेकाकी किमप्युद्यानं प्रविवेश।

प्रश्नाः –

i. ''भ्रान्तः बालः'' अनयोः पदयोः विशेषणपदं किमस्ति ?

ii. निर्जगाम इति क्रियापदस्य कर्तृपदं किमस्ति ?

iii. ''विद्यालयः'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

iv. ''यतस्ते'' अस्मिन् पदे कः सन्धिः अस्ति ?

प्रश्न 20 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

तदा खिन्नः बालकः एते पक्षिणो मानुषेषु नोपगच्छन्ति। तदन्वेषयाम्यपरं मानुषोचितं विनोदयितारमिति परिक्रम्य पलायमानं कमपि श्वानमवालोकयत्। प्रीतो बालस्तमित्थं सम्बोधयामास रे मानुषाणं मित्र! किं पर्यटसि अस्मिन् निदाघदिवसे? आश्रयस्वेदं प्रच्छायशीतलं तरूमूलम्। अहमपि क्रीडासहायं त्वामेवानुरूपं पश्यामिति।



docs.aglasem.com
aglasem.com

**प्र□ना : –**

i. "अहं" इति कर्तृपदस्य क्रियापदं किम् अस्ति ?

ii. "एते पक्षिणः" अनयोः पदयोः विशेष्यपदं किमस्ति ?

iii. "शत्रो! इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखत।

iv. दुःखी इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखत।

## 15. पद्य–खण्ड

प्रश्न 1 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

येषां न विद्या न तपो न दानं, ज्ञानं न शीलं गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति ।।

प्रश्नाः –

i. "चरन्ति" इति क्रियापदस्य कर्तृपदं किमस्ति ?

ii. "अधर्मः एतस्य विपर्यपदं श्लोकतः चित्वा लिखत।

iii. यस्य पार्श्वे विद्या, दानं, शीलं गुणः धर्मः च न सन्ति ते कुत्र भारभूताः ?

iv. "ते मर्त्यलोके भुवि भारभूताः" एतस्य वाक्यस्य हिन्दीभाषया अनुवादं लिखत।

प्रश्न 2 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम्।
सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम्।।

प्रश्नाः –

i. "नास्ति" इति कर्तृपदस्य क्रियापदं किमस्ति ?

ii. दुःखम इति पदस्य विपर्यपदं श्लोकात् चित्वा लिखतु।

iii. कः सुखम् त्यजेत् ?

iv. "सुखार्थिनः" इति पदे कः समास अस्ति ?



docs.aglasem.com
aglasem.com

प्रश्न 3 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।

प्रश्नाः –

i. आदत्ते इति क्रियापदस्य कर्तृपदं किमस्ति ?
ii. ''जलम्'' इति पदस्थाने किं पदं प्रयुक्तम् ?
iii. भूत्यर्थं इते पदे कः सन्धिरस्ति ?
iv. राजा दिलीपः केषां भूत्यर्थं बलिमग्रहीत् ?

प्रश्न 4 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दम्पती वशिष्ठस्य गुरोर्जग्मतुराश्रमम् ।।

प्रश्नाः –

i. श्लोकतः क्रियापदं चित्वा लिखत।
ii. ब्रह्म इति पदस्य पर्यायपदं श्लोकात् चित्वा लिखतु।
iii. ''दम्पती'' इति पदस्य समासविग्रहं कृत्वा लिखतु।
iv. श्लोकतः विशेषणपदं चित्वा लिखतु।

प्रश्न 5 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

निनादय नवीनामये वाणि! वीणाम्
मृदुं गाय गीतिं ललित–नीति–लीनाम्।
मधुर–मञ्जरी–पिञ्जरी–भूत–मालाः
वसन्ते लसन्तीह सरसा रसालाः
कलापाः ललित–कोकिला–काकलीनाम् ।।

प्रश्नाः –

i. मञ्जरी कदा शोभन्ते ?



docs.aglasem.com
aglasem.com

ii. ''मृदुं गाय गीतिं'' अस्मिन् वाक्ये विशेषणपदं किमस्ति ?

iii. ''आम्राः'' इति पदस्य पर्यायपदं गीततः चित्वा लिखतु।

iv. ''निनादय'' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

प्रश्न 6 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं उत्तरतु।

वहति मन्दमन्दं सनीरे समीरे,
कलिन्दात्मजायास्सवानीरतीरे ।
नतां पङ्क्तिमालोक्य मधुमाधवीनाम्,
निनादय नवीनामये वाणि! वीणाम् ।।

प्रश्नाः –

i. कविः भगवतीं भारतीं कस्याः तीरे मधुमाधवीनां नतां पक्तिम् अवलोक्य वीणां वादयितुं कथयति ?

ii. कीदृशीं वीणां निनादयितुं प्रार्थयति ?

iii. ''वायौ'' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

iv. ''नतां पङ्क्तिमालोक्य मधुमाधवीनाम्'' एतस्य हिन्दीभाषया अनुवादं करोतु।

प्रश्न 7 – उपरिलिखित–सर्वेषां श्लोकानां हिन्दीभाषया अनुवादं लिखतु।



docs.aglasem.com
aglasem.com

# 16. सुभाषितानि

प्रश्न 1 – स्वपाठ्यपुस्तकात् सुभाषितानि इति पाठतः द्वौ श्लोकौ लिखतु यौ अस्मिन् प्रश्नपत्रे न आगतौ।

प्रश्न 2 – अधोलिखितं सुभाषितं पूर्णं करोतु।

i. तपो बलं ............................................... ।
............................................... बलम् ।।

ii. येषां न विद्या ............................................... ।
............................................... मृगाश्चरन्ति ।।

iii. ............................................... निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरूषः ............................................... ।।

iv. ............................................... परं बलम् ।
............................................... भोजनं विषम् ।।

v. न सा सभा ...............................................वदन्ति धर्मम् ।
नासौ धर्मो ............................................... यच्छलेनाभ्युपेतम् ।।

प्रश्न 3 – अधोलिखितस्य श्लोकस्य अन्वयं कृत्वा लिखतु।

i. पुष्पे गन्धं तिले तैलं काष्ठेऽग्निं पयसि घृतम् ।
इक्षौ गुडं तथा देहे पश्याऽऽत्मानं विवेकतः ।।

ii. वैवस्वतो मनुर्नाम माननीयो मनीषिनाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।।

iii. सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम् ।
सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम् ।।

प्रश्न 4 – अधोलिखितस्य अन्वयस्य सम्बन्धितं श्लोकं लिखतु।

i. शुद्धिमतिः तदन्वये शुद्धिमत्तरः दिलीप इति राजेन्दुः क्षीरनिधौ इन्दुः इव प्रसूतः।

ii. अयं निजः परो वेति गणनां लघुचेतसाम् भवति परंतु उदारचरितानां (मानवः) वसुधाम् एव कुटुम्बकं भवति।

iii. तापसानां बलं तपः ब्रह्मविदां बलं ब्रह्म असाधुनां बलं हिंसा गुणवतां च बलम क्षमा अस्ति।



docs.aglasem.com
aglasem.com

# 17. सूक्ति–लेखनम्

प्रश्न 1 – स्वपाठ्यपुस्तकात् अन्वेषणं कृत्वा सूक्तीः लिखतु।

i. अभ्यासो न हि त्यक्तव्यः।
   (अभ्यास नहीं त्यागना चाहिए।)

ii. अभ्यासो हि परं बलम्।
   (अभ्यास ही श्रेष्ठ बल है।)

iii. अजीर्णे भोजनं विषम्।
   (नहीं पचने पर भोजन विष समान हो जाता है।)

iv. अनभ्यासे विषं विद्या।
   (अभ्यास नहीं होने पर विद्या अहितकारी हो जाती है।)

v. तपो बलं तापसानाम्।
   (तपस्वियों का बल तप है।)

vi. ब्रह्म ब्रह्मविदां बलम्।
   (ब्रह्म ब्रह्मज्ञानियों का बल है।)

vii. हिंसा बलमसाधूनाम्।
   (दुर्जनों का बल हिंसा है।)

viii. क्षमा गुणवतां बलम्।
   (गुणियों का बली क्षमा है।)

ix. सुखार्थिनः कुतो विद्या ?
   (सुख चाहने वाले की विद्या कहां ?)

x. उद्योगे नास्ति दारिद्रयम्।
   (परिश्रम में दरिद्रता नहीं है।)

xi. जपतो नास्ति पातकम्।
   (जप से पाप नहीं है।)

xii. मौने कलहो नास्ति।
   (मौन में कलह नहीं है।)



docs.aglasem.com
aglasem.com

xiii. नास्ति जागरिते भयम्।

( जागृत रहने पर भय नहीं है। )

xiv. सर्वं सत्ये प्रतिष्ठितम्।

( सभी सत्य में प्रतिष्ठित है। )

xv. नास्त्यभावो जगति मुर्खाणाम्।

( संसार में मूर्खों की कमी नहीं है। )

xvi. दिवसे मार्गभ्रान्तः संध्यायावद् यदि गृहमुपैति तदपि वरं नासौ भ्रान्तो मन्यते।

( दिन में मार्ग से भटका हुआ यदि संध्या तक घर आ जाता है तो वह भटका हुआ नहीं माना जाता है। )

xvii. पुरूषार्थैरेव लक्ष्यं प्राप्यते।

(पुरूषार्थ से ही लक्ष्य प्राप्त किया जाता है। )

प्रश्न 2 – अधोलिखितानां सूक्तीनां हिन्द्यर्थं लिखतु।

i. अभ्यासो न हि त्यक्तव्यः।

ii. तपो बलं तापसानाम्।

iii. सुखार्थिनः कुतो विद्या ?

iv. जपतो नास्ति पातकम्।

v. नास्त्यभावो जगति मुर्खाणाम्।

प्रश्न 3 – अधोलिखित–हिन्द्यर्थं पाठ्यपुस्तकतः सूक्तीः चित्वा लिखतु।

i. गुणियों का बल क्षमा है।

ii. नहीं पचने पर भोजन विष के समान हो जाता है।

iii. ब्रह्मज्ञानियों का बल ब्रह्म है।

iv. परिश्रम में दरिद्रता नहीं है।

v. संसार में मूर्खों की कमी नहीं है।



docs.aglasem.com
aglasem.com

# 18. पाठाधारिताः वस्तुनिष्ठ प्रश्नाः

प्रश्न 1 – उचितपदैः रिक्तस्थानानि पूरयतु।

i. विवेकानन्दः बाल्यकाले ...................................... आसीत्।

ii. ...................................... ग्रहगतिं परिशील्य उक्तवान्।

iii. विधिक प्रबन्ध दृष्ट्या वनानि ...................................... विभक्तानि।

iv. खलस्य विद्या ......................................भवति।

v. मम तु ...................................... एव प्रहरणम्।

vi. किशोरावस्थायां ...................................... गम्भीरप्रवृतिं प्राप्तवान्।

vii. ...................................... दृष्टिबाधित–छात्रः आसीत्।

viii. तपोदत्तः ...................................... विद्यामवाप्तुं प्रवृतः अभवत्।

ix. दिलीपस्य पत्नी–नाम ...................................... आसीत्।

x. श्रेष्ठिनः पुत्रस्य नाम ...................................... आसीत्।

प्रश्न 2 – सुमेलनं करोतु।

i.

| (क) | (ख) | सुमेलनम् |
|---|---|---|
| सूरणकन्दम् | आरक्षिंत वनम् | .............................. |
| साधु साधु | ज्ञानाय | .............................. |
| अभयारण्यम् | अर्जुनः | .............................. |
| साधोर्विद्या | शाकम् | .............................. |
| बृहन्नला | मेघः | .............................. |

ii.

| (क) | (ख) | सुमेलनम् |
|---|---|---|
| रामेश्वरकँवरः | ज्ञातिजैनः गहितः | .............................. |
| नीलेशः | वैवस्वतः | .............................. |
| तपोदत्तः | गहिरागुरूः | .............................. |
| मनुः | वसन्ते | .............................. |
| सरसा रसालाः | ब्रेललिपि–माध्यमेन | .............................. |

docs.aglasem.com



aglasem.com

प्रश्न 3 – उचितं पदं चित्वा रिक्तस्थानानि पूरयतु।

i. वाणिक्यपुत्रस्य नाम .................... आसीत्। ( जीर्णधनः / धनदेवः )

ii. .................... विद्यामवाप्तुं तपस्यारतः आसीत्। ( तपोदत्तः / पुरूषः )

iii. .................... ब्रेललिपिमाध्यमेन पठनं करोति स्म। ( नीलेशः / धनुषः )

iv. गहिरागुरोः मातुः नाम .................... आसीत्। ( सुचित्रादेवी / सुमित्रादेवी )

v. राज्ञः विराटस्य पुत्र .................... आसीत्। ( उत्तरः / अभिमन्युः )

प्रश्न 4 – मञ्जूषातः चित्वा उचितैः पदैः रिक्तस्थानानि पूरयतु।

(क)

| हिंसायाः, वृथा, अन्था, स्वच्छतायाः, नियन्त्रणं |
|---|

i. वनानि पृथिव्याः तापमानस्य .................... करोति।

ii. भवान् किमर्थम् इदं शुष्कं क्षेत्रं .................... कर्षति।

iii. गहिरागुरूः जनान् .................... महत्वम् अबोधयत्।

iv. साम्प्रतम् अखिले संसारे अशालेः .................... च साम्राज्यं व्याप्तम्।

v. तत् समर्पय मे सुतम् .................... राजकुले निवेदयिष्यामि।

(ख)

| कृत्वा, स्नानार्थं, स्नात्वा, ब्रूहि, वसुन्धरायाः |
|---|

i. भवती शीघ्रं .................... आगच्छतु।

ii. वस्तुतः वनपं .................... सुरक्षावलयमस्ति।

iii. अपूर्व इ वते हर्षो .................... केनासि विस्मितः ?

iv. तां स्पर्शं .................... जानाभ्यहम्।

v. परमहं नद्यां .................... गमिष्यामि।

प्रश्न 5 – दत्तेभ्यः विकल्पेभ्यः साधु उत्तरं चित्वा लिखतु।

i. विवेकानन्द–विमानपत्तनम् अस्ति।

(क) रायपुरे (ख) बिलासपुरे

(ग) नागपुरे (घ) जगदलपुरे

ii. विवेकानन्दस्य बाल्यकालस्य नाम आसीत्।

(क) महेन्द्रः (ख) नरेन्द्रः

(ग) देवेन्द्रः (घ) हरेन्द्रः

iii. ''साधु–साधु'' इति वदन् चिन्तितवान्।

(क) मेघः (ख) कृषकः

(ग) दैवज्ञः (घ) जनः



docs.aglasem.com
aglasem.com

iv. आकाशे सञ्चरन् आसीत्।

(क)एकः जनः (ख) एकः मेघः

(ग) एकं यानम् (घ) एकः पक्षी

v. छत्तीसगढस्य सकलक्षेत्रफलस्य प्रतिशतानि क्षेत्राणि वनाच्छादितानि सन्ति।

(क) 12.26 (ख) 14.26

(ग) 44.2 (घ) 24.2

vi. छत्तीसगढस्य राजकीयः पक्षी अस्ति।

(क) कपोतः (ख) पिकः

(ग) काकः (घ) पर्वतसारिका

vii. अचानकमारः अभयारण्यम् अस्ति।

(क) धमतरी–मण्डलान्तर्गते (ख) बीजापुर–मण्डलान्तर्गते

(ग) मुंगेली–मण्डलान्तर्गते (घ) कवर्धा–मण्डलान्तर्गते

viii. साधोः शक्ति भवति।

(क) परिणीडनाय (ख) ज्ञानाय

(ग) दानाय (घ) रक्षणाय

ix. अग्निं निहितं –

(क) पुष्पे (ख) तिले

(ग) काष्ठे (घ) इक्षौ

x. ''प्रत्याभिज्ञानम्'' नाट्यांशः नाट्कात् उद्घृतः –

(क) पञ्चरात्रम् (ख) अभिज्ञान शाकुन्तलम्

(ग) स्वप्नवासवदत्तम (घ) मुद्राराक्षसकम्

xi. बृहनल्ला वेषधारी आसीत्।

(क) युधिष्ठिरः (ख) भीमसेनः

(ग) अर्जुनः (घ) द्रौपदी

xii. सौभद्रः ग्रहणं गतः।

(क) भीमसेनेन (ख) भटेन

(ग) अर्जुनेन (घ) उत्तरेण



docs.aglasem.com
aglasem.com

xiii. भुजौ एव प्रहरणम् अस्ति।

(क) अर्जुनस्य (ख) भीमसेनस्य

(ग) अभिमन्योः (घ) राज्ञः विराटस्य

xiv. रामेश्वरकँवरः गहिराग्रामे निर्माणं कारितवान्।

(क) शिवमन्दिरस्य (ख) श्री गणेश मन्दिरस्य

(ग) श्री कृष्ण मन्दिरस्य (घ) श्री विष्णु मन्दिरस्य

xv. ब्रेललिप्याः आविष्कारं कृतवान् आसीत्।

(क) लुई ब्रेल (ख) लुई पाश्चर

(ग) गिल्बर्ट एन लुईस (घ) लुईस हेमिल्टन

xvi. रामः मकरालये सेतुं बबन्ध।

(क) शिलाभिः (ख) सिकताभिः

(ग) मृदाभिः (घ) काष्ठैः

xvii. वैवस्वतो मनोः वंशे प्रसूतः।

(क) दिलीपः (ख) युधिष्ठिरः

(ग) पृथ्वीराजः (घ) चन्द्रगुप्तः

xviii. दिलीपस्य गुरूः आसीत्।

(क) दुर्वासा (ख) विश्वामित्रः

(ग) द्रोणाचार्यः (घ) वसिष्ठः

xix. ''अयं परो वेति'' गणनां भवति।

(क) उदारचरितानाम् (ख) लघुचेतसाम्

(ग) सताम् (घ) साधूनाम्

xx. संसारे इदानीं इयं सम्भावना सर्वदा आक्रान्तं करोति।

(क) द्वितीय विश्वयुद्धस्य (ख) तृतीय विश्वयुद्धस्य

(ग) चतुर्थ विश्वयुद्धस्य (घ) प्रथम विश्वयुद्धस्य

xxi. शान्तिमय जीवनाय आवश्यकम् अस्ति।

(क) विश्वबन्धुत्वम् (ख) स्वार्थलोलुपता

(ग) निज–परोभावः (घ) हिंसा–भावः



docs.aglasem.com
aglasem.com

xxii. ''भारतीवसन्तगीतिः'' गीतः सङ्कलितः।

(क) काकली गीत संग्रहतः (ख) राष्ट्रगौरवम् गीत संग्रहतः

(ग) मीरालहरी काव्यकृतितः (घ) काव्यकल्लोलिनी गीत सग्रहतः

xxiii. ''भारतीवसन्तगीतिः'' इत्यस्य गीतस्य रचनाकारः अस्ति।

(क) पण्डिता क्षमाराव (ख) राधावल्लभ त्रिपाठी

(ग) जानकी वल्लभ शास्त्री (घ) जयदेवः

xxiv. सरसा रसाला लसन्ति।

(क) वसन्ते (ख) ग्रीष्मे

(ग) हेमन्ते (घ) शिशिरे

xxv. जीर्णधनः आसीत्।

(क) वणिक्पुत्रः (ख) राजपुत्रः

(ग) कृषकपुत्रः (घ) द्विजपुत्रः

xxvi. जीर्णधनस्य गृहे पूर्वपुरूषोपार्जिता आसीत्।

(क) लौहघटिता तुला (ख) धेनुः

(ग) स्वर्णहारः (घ) हीरकः

xxvii. विवदमानौ तौ गतौ।

(क) राजकुलम् (ख) न्यायालयम्

(ग) मान्त्रिगृहम् (घ) स्व–स्व गृहम्

xxviii. जीर्णधनः गिरिगुहायाः द्वारम् आच्छादितवान्।

(क) वृहच्छिलया (ख) काष्ठपटेन

(ग) वृक्षस्य शाखायाः (घ) सिकताभिः

xxix. भ्रान्तो बालः पाठगमनवेलायां प्रविवेश।

(क) क्रीडाङ्गनम् (ख) उद्यानम्

(ग) निर्जनस्थानम् (घ) गृहम्

xxx. खिन्नः बालः पलायमानं .................... अलोक्यत्।

(क) अश्वम् (ख) वृषभम्

(ग) श्वानम् (घ) मार्जारम्



docs.aglasem.com
aglasem.com

# 19. प्रश्नोत्तर खण्ड

प्रश्न 1 — संस्कृतभाषया उत्तरतु। (हिन्दीभाषयापि उत्तरतु)

i. विवेकानन्दः बाल्यकाले कीदृशः आसीत् ?
ii. कस्मै क्रीडा अतीव रोचते स्म ?
iii. विवेकानन्दस्य बाल्यकालस्य नाम किम् आसीत् ?
iv. का सम्यक् नास्ति ?
v. कुत्र यातायातं सघनं भवति ?
vi. कः सर्वान् मेघान् आहूय प्रार्थनाम् अकरोत ?
vii. अनावृष्टौ ग्रामवासिनः किम् अकुर्वन् ?
viii. कः न त्यक्तव्यः ?
ix. कृषकः प्रतिदिनं स्वशुष्कक्षेत्रं किं कुर्वन्नासीत् ?
x. के स्वक्षेत्रे कृषिकार्यम् आरब्धवन्तः ?
xi. वनस्य महत्वं किम् ?
xii. कस्मिन् वने उत्पादनेन सह वनसंरक्षणं प्रथमं लक्ष्यमस्ति ?
xiii. छत्तीसगढस्य वनानि कीदृशानि सन्ति ?
xiv. छत्तीसगढप्रदेशः केन समृद्धः ?
xv. वनं कस्याः अपर्दनं न्यूनी करोति ?
xvi. के आरक्षितं वनं कथ्येते ?
xvii. वनानि कति वर्गेषु विभक्ताः ?
xviii. वनं कस्य तापमानस्य नियन्त्रणं करोति ?
xix. वनः कस्याः सुरक्षावलयम् अस्ति ?
xx. केषां रक्षणार्थमपि वन संरक्षणम् आवश्यकम् अस्ति ?
xxi. कस्मिन् दरिद्रयं नास्ति ?
xxii. हिंसा केषां बलमस्ति ?
xxiii. साधोः विद्या कस्मै भवति ?
xxiv. केन तपते रविः ?
xxv. घृतं कुत्र तिष्ठति ?



docs.aglasem.com
aglasem.com

xxvi. अभिमन्युः कथं गृहीतः आसीत् ?

xxvii. अभिमन्योः पितुः नाम किमासीत् ?

xxviii. कृष्णः कस्य मातुलः आसीत् ?

xxix. पञ्चरात्रम् नाटकस्य लेखकः कः अस्ति ?

xxx. कै धनुः गृह्यते ?

xxxi. गहिरागुरोः जन्म कदा अभवत् ?

xxxii. गुरूः कान् स्वच्छतायाः महत्वम् अवबोधयत् ?

xxxiii. का गहिरागुरोः माता आसीत् ?

xxxiv. गहिरागुरूः केन सह जनान् शान्तिव्यवस्थायै न्यवेदयत् ?

xxxv. गहिरागुरूः कुत्र शिवमन्दिरस्य निर्माणं कारितवान् ?

xxxvi. नीलेशः केन माध्यमेन पठति ?

xxxvii. सङ्गणकः किं करोति ?

xxxviii. द्वारमध्ये कया लिप्या कक्षायाः संस्था लिखिता ?

xxxix. धनुषः कथं मित्रस्य सहायतां करोति।

xl. नीलेशः कस्य मित्रम् अस्ति ?

xli. कथासरित्सागरस्य लेखकः कः अस्ति ?

xlii. अनधीतः तपोदत्तः कैः गर्हितोऽभवत् ?

xliii. तपोमात्रेण विद्यां प्राप्तुं कः प्रयासरतः आसीत् ?

xliv. निर्माणिभोगीव कः न शोभते ?

xlv. रामः मकरालये काभिः सेतुं बबन्ध ?

xlvi. का भगवत्या शारदायाः अवमाननास्ति ?

xlvii. किं कृत्वा एव विद्याभ्यासः करणीयः ?

xlviii. दिलीपस्य पत्नी का आसीत् ?

xlix. स प्रजाभ्यो बलिम् किमर्थं अग्रहीत् ?

l. केषां रक्षणात् भरणात् च राजा दिलीपः पिता आसीत् ?

li. राजा दिलीपः कस्य आश्रमं जगाम ?

lii. कया सदृशागमः ?

liii. विद्वेषस्य कारणानि कानि–कानि सन्ति ?

liv. शान्तये के प्रयत्नशीलाः सन्ति ?



docs.aglasem.com
aglasem.com

lv. कयोः विनाशलीलां सर्वे जानन्ति एव ?

lvi. कीदृशाः देशाः दुर्बलेषु देशेषु आक्रमणं न कुर्युः ?

lvii. अखिलं विश्वं कभिः पीडितम् अस्ति ?

lviii. अलीनां ततिः कीदृशी अस्ति ?

lix. कविः वीणापाणिं किं कथयति ?

lx. वसन्ते किं भवति ?

lxi. वाणी कीदृशीं गीतिं गायतु ?

lxii. कुत्र समीरः मन्दमन्दं वहति ?

lxiii. वसन्ते कासां कलापः विलसन्ति ?

lxiv. धर्माधिकारिभिः जीर्णधनश्रेष्ठिनौ कथं सन्तोषितौ ?

lxv. जीर्णधनः गिरिगुहाद्वारं कया आच्छाद्य गृहमागतः ?

lxvi. 'लौहतुला' इति कथा कस्मिन् ग्रन्थे अस्ति ?

lxvii. श्रेष्ठिनः अनुसारं कैः तुला भक्षिता ?

lxviii. जीर्णधनस्यानुसारं कुतः शिशुः श्येनेन हृतः ?

lxix. बालकः कीदृशं चटकम् अपश्यत् ?

lxx. बालः कदा क्रीडितुं निर्जगाम ?

lxxi. कीदृशः बालः उद्यानं प्रविवेश ?

lxxii. भ्रान्तः बालकः कस्मात् ग्रन्थात् उद्घृतः अस्ति ?

lxxiii. किं भूत्वा सः वैदुषीं सम्पदं च लेभे ?

lxxiv. चटका तृणशलाकां आदाय कुत्र गच्छन्नासीत् ?

# 20. प्रश्ननिर्माणम्

प्रश्न 1 – रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं करोतु।

i. वयं विवेकानन्दस्य विषये ज्ञातुम् इच्छामः।

ii. विवेकानन्दः जिज्ञासुः आसीत्।

iii. विवेकानन्दः किशोरावस्थायां रायपुरनगरे कालं व्यतीतवान्।

iv. गृहे शाकं नास्ति।



docs.aglasem.com
aglasem.com

v. विवेकानन्दस्य पाककलायां रूचिः आसीत्।

vi. भूमिः शुष्का जाता।

vii. कृषकः शुष्कक्षेत्रं कर्षति।

viii. जनाः ग्रामं परित्यज्य गताः।

ix. ग्रामवासिनः जीवनार्थं यत्र कुत्रापि गतवन्तः।

x. दैवज्ञः ग्रहगतिं परिशील्य उक्तवान्।

xi. वृष्टेः मुख्यकारणं वनमेव अस्ति।

xii. वनम् अस्माकं महान् निधिः अस्ति।

xiii. वनं वसुन्धरायाः सुरक्षावलयमस्ति।

xiv. संरक्षितवने उत्पादनेन सह वनसंरक्षणं प्रथमलक्ष्यमस्ति।

xv. वन्यजीवानां बहुलता विविधता च प्रदेशस्य गौरवम्।

xvi. क्षमा गुणवतां बलम्।

xvii. खलस्य शक्तिः परेषां परिपीडनाय भवति।

xviii. सत्येन धार्यते पृथिवी।

xix. विद्यार्थिनः सुखम् नास्ति।

xx. इक्षौ गुडं भवति।

xxi. विराटनगरे क्षत्रियवंशोद्भूताः नीचैः अपि नामभिः अभिभाष्यन्ते।

xxii. अस्माकं कुले आत्मस्तवं कर्तुमनुचितम्।ए

xxiii. अहम् कुमारस्य दर्पप्रशननं करोमि।

xxiv. अयं भीमसेनः अस्ति।

xxv. गहिरागुरोः बाल्यकालः प्रकृत्याः सान्निधये व्यतीतः।

xxvi. नोवाखलीस्थाने 1947 खीस्ताब्दे भीषणोपद्रवः अभवत्।

xxvii. अद्यापि जनाः गहिरागुरूम् आदरपूर्वकं स्मरन्ति।

xxviii. गहिरागुरोः अनुयायिनः तस्य विचारस्य प्रसारं प्रचारं च कृतवन्तः।

xxix. गहिरागुरूः जनजातीयसमूहस्य नेतृत्वम् अकरोत्।

xxx. नीलेशः ब्रेललिप्याः माध्यमेन पठनं लेखनं च करोति।

xxxi. इयं विशिष्टा लिपिः अस्ति।

xxxii. सङ्गणकः नीलेशस्य मित्रम् अस्ति।

xxxiii. विद्यालये विविधोपकरणानि न सन्ति।



docs.aglasem.com
aglasem.com

xxxiv. वयं सर्वे छात्राः आवेदनं कुर्याम।

xxxv. अहं पितृचरणैः क्लेशयमानोऽपि विद्यां नाऽधीतवानस्मि।

xxxvi. मूढोऽयं सिकताभिः सेतुं निर्मातुं प्रयतते।

xxxvii. तपोदत्तः विद्याध्ययनाय गुरूकुलमेव गच्छाति।

xxxviii. तपोदत्तः तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्ति।

xxxix. गुरूगृहं गत्वैव विद्याभ्यासः करणीयः।

xl. मनीषिणां माननीयः वैवस्वतः मनुः आद्यः आसीत्।

xli. दिलीपः क्षीरनिधौ इन्दुः इव प्रसूतः।

xlii. प्रज्ञया सदृशागमः।

xliii. तौ विधातारम् अभ्यर्च्य वशिष्ठस्य आश्रमं जग्मतुः।

xliv. रविः सहस्रगुणम् उत्स्रष्टुं रसं आदत्ते।

xlv. सर्वान् जनान् प्रति बन्धुत्वस्य भावः एव विश्वबन्धुत्वम् इति कथ्यते।ण

xlvi. मानवः मानवं प्रति बन्धुवत् आचरणं कुर्यात्।

xlvii. जीवने शान्तिः दुर्लभा जाता।

xlviii. आयुधानाम् अविवेकपूर्णः संग्रहः विश्वं नाशं प्रति नयन्ति।

xlix. शक्तिवर्धनाय देशाः संघर्षरताः सन्ति।

l. श्रेष्ठिनः शिशुः स्नानोपकरणामादाय अभ्यागतेन सह प्रस्थितः।

li. सभ्यैः तौ परस्परं संबोध्य तुला–शिशु–प्रदानेन सन्तोषितौ।

lii. श्येनः शिशुं हर्तुं समर्थो भवति।

liii. तौ द्वावपि राजकुलं गतौ।

liv. शिशुं गिरिगुहायां प्रक्षिप्य गृहभागतः।

lv. बालः चटकायै स्वादूनि भक्ष्यकवलानि ते दातुम् इच्छति।

lvi. रक्षानियोगकारणात् मया न भ्रष्टव्यम्।

lvii. बालः विघ्नमनोरथः अस्ति।

lviii. कुक्कुरः मानुषाणां मित्रम् अस्ति।



docs.aglasem.com
aglasem.com